[1]अनुरोधी[A] ।

(1424) "रुधिर् आवरणे" (VII-रुधादिः-1438. सक. अनि. उभ.)

'आवरणम्=व्याप्तिः ।' इति क्षीरस्वामी ।

'रुन्धे रुणध्यावरणे, कामेऽनावनुरुध्यते ॥' (श्लो. 121) इति देवः ।

रोधकः-धिका, रोधकः-धिका, रुरुत्सकः-त्सिका, रोरुधकः-धिका ;
रोद्धा-रोद्ध्री, रोधयिता-त्री, रुरुत्सिता-त्री, रोरुधिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि रौधादिकभिन्दतिवत (1160) ज्ञेयानि ।
[2]अङ्गरोधी-उपरोधी, [3]प्रतिरोधी, [4]अनुरोधी, [5]व्रजे उपरुध्य-व्रजोपरोधं, [B]कारोपरोधम् वा गाः-पाययति, [6]रोधनः, [7]मार्गरुत्[C]-द्-रुधौ-रुधः, [8]विरोधी,

---

1. तच्छीलादिषु कर्तृषु, 'सम्पृचानुरुध....' (3-2-142) इति घिनुण्। अत्र, "...'अनो रुध कामे' इत्यस्य तु दैवादिकस्याग्रहणम्-पृचिना साहचर्यात्। अनुना सह पठितस्य दैवादिकस्य ग्रहणमित्यन्ये ।" इति पदमञ्जरी। वस्तुतः—रौधादिकस्यैव धातोरनुपूर्वकत्वे कामनार्थकत्वे च दैवादिकपाठः इत्यस्य सैद्धान्तिकपक्षत्वेन प्रकृतसूत्रे (3-2-142) दैवादिकस्यैवास्य ग्रहणम्। साहचर्यपरिभाषाश्रयणे च अनन्यथासिद्धं बीजं न पश्यामः । अत एव क्वचिद् भट्टिकाव्यव्याख्याने (7-9) 'एता देवानुरोधिन्यो द्वेषिण्य इव रागिणम्।' इत्यत्र अनुरुध्यन्तीति श्यना विवरणं संगतम्। इत्यलमत्र।

2. अङ्गानि रुणद्धीति अङ्गरोधी। ग्रह्यादिषु (3-1-134) कर्मण्यणोऽपवादो णिनिप्रत्ययः। एवम् उपरुणद्धीति उपरोधी इत्यत्रापि ग्रह्यादित्वादेव णिनिः ।

3. 'भविष्यति गम्यादयः' (3-3-3) इत्यत्र गणे पाठात् भविष्यत्काले औणादिको णिनिरत्र।

4. 'सम्पृचानुरुध—' (3-2-142) इत्यादिना ताच्छीलिको घिनुण्प्रत्ययः।

5. 'सप्तम्यां चोपपीडरुधकर्षः' (3-4-49) इति सप्तम्यन्ते तृतीयान्ते चोपपदे उपपूर्वकादस्मात् णमुल्। 'तृतीयाप्रभृतीनि—' (2-2-21) इति समासविकल्पः।

6. नन्द्यादिषु पाठपरिकल्पनादत्र कर्तरि ल्युप्रत्ययः।

7. मार्गं रुणद्धीति मार्गरुध्, 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विप्।

8. विशेषेण रुणद्धीति विरोधी, 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः ।

A. 'कंसानुरोध्यणनहन्मतिमद्युगर्च्यः—॥' धा. का. 2-62.
[अत्र धा. का. व्याख्यायां णिन्यन्तत्वेन प्रकृतशब्दस्य निष्पत्तिः कृतेति विभाव्यम् ।]

B. 'तं शूरसूनुं सह जाययोग्रः कारोपरोधं निगलैरसेद्ध ॥' वा. वि. 2.40.

C. 'निरुध्यमाना यदुभिः कथञ्चित् मुहुर्यदुच्चिक्षिपुरग्रपादान् ।
ध्रुवं गुरून् मार्गरुधः करीन्द्रानुलङ्घ्य गन्तुं तुरगास्तदीषुः ॥' शि. व. 3-29.